# Radhastotram ShrIkrishnakritam

# શ્રીરાધાસ્તોત્રં શ્રીકૃષ્ણકૃતમ્

## Document Information

Text title : shrIraadhaastotraM shrIkRiShNakRitam

File name : raadhaakrishnakrit.itx

Category : devii, rAdhA, stotra, devI

Location : doc_devii

Transliterated by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Proofread by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Translated by : -

Latest update : July 1, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીરાધાસ્તોત્રં શ્રીકૃષ્ણકૃતમ્

શ્રીકૃષ્ણ ઉવાચ ।
એવમેવ પ્રિયોઽહં તે પ્રમોદશ્ચૈવ તે મયિ ।
સુવ્યક્તમદ્ય કાપટ્યવચનં તે વરાનને ॥ ૧॥

હે કૃષ્ણ ત્વં મમ પ્રાણા જીવાત્મેતિ ચ સંતતમ્ ।
બ્રૂષે નિત્યં તુ યત્ પ્રેમ્ણા સામ્પ્રતં તદ્ ગતં દ્રુતમ્ ॥ ૨॥

અસ્માકં વચનં સત્યં યદ્ બ્રવીમિતી તદ્ ધ્રુવમ્ ।
પઞ્ચપ્રાણાધિદેવી ત્વં રાધા પ્રાણધિકેતિ મે ॥ ૩॥

શક્તો ન રક્ષિતું ત્વાં ચ યાન્તિ પ્રાણસ્ત્વયા વિના ।
વિનાધિષ્ઠાતૃદેવીં ચ કો વા કુત્ર ચ જીવતિ ॥ ૪॥

મહાવિષ્ણોશ્ચ માતા ત્વં મૂલપ્રકૃતિરીશ્વરી ।
સગુણા ત્વં ચ કલયા નિર્ગુણા સ્વયમેવ તુ ॥ ૫॥

જ્યોતીરૂપા નિરાકારા ભક્તાનુગ્રહવિગ્રહા ।
ભક્તાનાં રુચિવૈચિત્ર્યન્નાનામૂર્તીશ્ચ બિભ્રમતી ॥ ૬॥

મહાલક્ષ્મિશ્ચ વૈકુણ્ઠે ભારતી ચ સતાં પ્રસૂઃ ।
પુણ્યક્ષેત્રે ભારતે ચ સતી ત્વં પાર્વતી તથા ॥ ૭॥

તુલસી પુણ્યરૂપા ચ ગઙ્ગા ભુવનપાવની ।
બ્રહ્મલોકે ચ સાવિત્રી કલયા ત્વં વસુન્ધરા ॥ ૮॥

ગોલોકે રાધિકા ત્વં ચ સર્વગોપાલકેશ્વરી ।
ત્વયા વિનાહં નિર્જીવો હ્યશક્તઃ સર્વકર્મસુ ॥ ૯॥

શિવઃ શક્તસ્ત્વયા શક્ત્યા શવાકારસ્ત્વયા વિના ।
વેદકર્તા સ્વયં બ્રહ્મા વેદમાત્રા ત્વયા સહ ॥ ૧૦॥

નારાયણસ્ત્વયા લક્ષ્મ્યા જગત્પાતા જગત્પતિઃ ।

ફલં દદાતિ યજ્ઞશ્ચ ત્વયા દક્ષિણયા સહ ॥ ૧૧॥

બિભર્તિ સૃષ્ટિં શેષશ્ચ ત્વાં કૃત્વા મસ્તકે ભુવમ્ ।
બિભર્તિ ગઙ્ગારૂપાં ત્વાં મૂર્ધ્નિ ગઙ્ગાધરઃ શિવઃ ॥ ૧૨॥

શક્તિમચ્ચ જગત્ સર્વં શવરૂપં ત્વયા વિના ।
વક્તા સર્વસ્ત્વયા વાણ્યા સૂતો મૂકસ્ત્વયા વિના ॥ ૧૩॥

યથા મૃદા ઘટં કર્તું કુલાલઃ શક્તિમાન્ સદા ।
સૃષ્ટિં સ્રષ્ટું તથાહં ચ પ્રકૃત્યા ચ ત્વયા સહ ॥ ૧૪॥

ત્વયા વિના જડશ્ચાહં સર્વત્ર ચ ન શક્તિમાન્ ।
સર્વશક્તિસ્વરૂપા ત્વં સમાગચ્છ મમાન્તિકમ્ ॥ ૧૫॥

વહ્નૌ ત્વં દાહિકા શક્તિર્નાગ્નિઃ શક્તસ્ત્વયા વિના ।
શોભાસ્વરૂપા ચન્દ્રે ત્વં ત્વાં વિના ન સ સુન્દરઃ ॥ ૧૬॥

પ્રભારૂપા હિ સૂર્યે ત્વં વિના ન સ ભાનુમાન્ ।
ન કામઃ કામિનીબન્ધુસ્ત્વયા રત્યા વિના પ્રિયે ॥ ૧૭॥

ઇત્યેવં સ્તવનં કૃત્વા તાં સમ્પ્રાપ જગત્પ્રભુઃ ।
દેવા બભૂવુઃ સથીકાઃ સભાર્યાઃ શક્તિસંયુતાઃ ॥ ૧૮॥

સસ્ત્રીકં ચ જગત્ સર્વં બભૂવ્ શૈલકન્યકે ।
ગોપીપૂર્ણશ્ચ ગોલોકો બભૂવ તત્પ્રસાદતઃ ॥ ૧૯॥

રાજા ચ જગામ્ ગોલોકમિતિ સ્તુત્વા હરિપ્રિયામ્ ।
શ્રીકૃષ્ણેન કૃતં સ્તોત્રં રાધાયા યઃ પઠેન્નરઃ ॥ ૨૦॥

કૃષ્ણભક્તિં ચ તદ્દાસ્યં સ પ્રાપ્નોતિ ન સંસયઃ ।
સ્ત્રીવિચ્છેદેયઃ શ◌ૃણોતિ માસમેકમિદં શુચિઃ ॥ ૨૧॥

અચિરાલ્લભતે ભાર્યાં સુશીલાં સુન્દરીં સતીમ્ ।
ભાર્યાહીનો ભાગ્યહીનો વર્ષમેકં શ◌ૃણોતિ યઃ ॥ ૨૨॥

અચિરાલ્લભતે ભાર્યાં સુશીલાં સુન્દરીં સતીમ્ ।
પુર મયા ચ ત્વં પ્રાપ્તા સ્તોત્રેણાનેન પાર્વતિ ॥ ૨૩॥

મૃતાયાં દક્ષકન્યાયામાજ્ઞયા પરમાત્મનઃ ।
સ્તોત્રેણાનેન સમ્પ્રાપ્તા સાવિત્રી બ્રહ્મણા પુરા ॥ ૨૪॥

પુરા દુર્વાસસઃ શાપાન્નિઃશ્રીકે દેવતાગણે ।
સ્તોત્રેણાનેન દેવૈસ્તૈઃ સમ્પ્રાપ્તા શ્રીઃ સુદુર્લભા ॥ ૨૫ ॥

શ‍ૃણોતિ વર્ષમેકં ચ પુત્રાર્થિ લભતે સુતમ્ ।
મહાવ્યાધી રોગમુક્તો ભવેત્ સ્તોત્રપ્રસાદતઃ ॥ ૨૬ ॥

કાર્તિકીપૂર્ણમાયાં તુ તાં સમ્પૂજ્ય પઠેત્તુ યઃ ।
અચલાં શ્રિયમાપ્નોતિ રાજસૂયફલં લભેત્ ॥ ૨૭ ॥

નારી શ‍ૃણોતિ ચેત્ સ્તોત્રં સ્વામિસૌભાગ્યસંયુતા ।
ભક્ત્યા શ‍ૃણોતિ યઃ સ્તોત્રં બન્ધનાન્મુચ્યતે ધ્રુવમ્ ॥ ૨૮ ॥

નિત્યં પઠતિ યો ભક્ત્યા રાધાં સમ્પૂજ્ય ભક્તિતઃ ।
સ પ્રયાતિ ચ ગોલોકં નિર્મુક્તો ભવબનાત્ ॥ ૨૯ ॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે શ્રીકૃષ્ણકૃષ્ણકૃતં
શ્રીરાધાસ્તોત્રં સમ્પૂર્ણમ્ ।

---

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

---

*Radhastotram ShrIkrishnakritam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*